# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – साहित्यम् | CC-3.6.12 | समयः - ११ तः २ |
| दिनाङ्कः – २३/४/२०१६ | सन्दर्भग्रन्थः – किरातार्जुनीयम् –सर्गः १ मल्लिनाथटीकासहितम् | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **सन्दर्भप्रसङ्गपुरस्सरं त्रिभ्यः श्लोकेभ्यः श्लोकद्वयस्य मल्लिनाथटीकानुसारं व्याख्या कार्या ।** | ०८ |
| | (१) श्रियः कुरुणामधिपस्य पालनीं प्रजासुवृत्तिं यमयुङ्क्तवेदितुम् ।<br>स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥<br>(२) निसर्गदुर्बोधमबोधविक्लवा क्व भूपतीनां चरितं क्व जन्तवः ।<br>तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवार्त्म विद्विषाम् ॥<br>(३) निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम् ।<br>प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥ | |
| **प्रश्नः -२** | महाकवेः भारवेः जीवनकवनपरिचयं लिखत ।<br>अथवा<br>महाकाव्यलक्षणानां विवेचनं कुरुत । | ०८ |
| **प्रश्नः -३** | **अधोलिखितेभ्यः टिप्पणीद्वयं लिखत ।** | ०४ |
| | (१) द्रौपदी (२) युधिष्ठिरः (३) वनेचरः (४) भीमदेहः | |
| **प्रश्नः - ४** | **एकैकवाक्येन पञ्चानां प्रश्नानां उत्तराणि लिखत** | ०५ |
| | (१) किरातार्जुनीयग्रन्थस्य लेखकः कोऽस्ति ?<br>(२) किरातार्जुनीयमहाकाव्ये कति सर्गाः सन्ति ?<br>(३) भारविः कस्य सम्प्रदायस्य अनुयायी आसीत् ?<br>(४) भारविः इत्यस्य कोऽर्थः ?<br>(५) किरातार्जुनीयमहाकाव्ये कः प्रधानरसोऽस्ति ?<br>(६) किं सखा इत्यस्य कोऽर्थः ?<br>(७) भूभृत् इत्यस्य प्रथमा बहुवचनं लिखत । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **निम्नलिखितेभ्यः श्लोकेभ्यः द्वयोः व्याख्यां कुरुत ।** | ०८ |
| | (१) अनेकराजन्यरथाश्वसङ्कुलं तदीयमास्थाननिकेतनाजिरम् ।<br>नयत्ययुग्मच्छदगान्धिरार्द्रतां नृपोपायनदन्तिनां मदः ॥<br>(२) न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।<br>गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥<br>(३) प्रलीनभूपालाम्पि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।<br>स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ | |
| | | |

| | | |
|---|---|---|
| प्रश्नः -६ | प्रथमसर्गस्य सारांशं लिखत ।<br>अथवा<br>द्रौपद्याः युधिष्ठिरं प्रति कथनं ग्रन्थोक्तपद्धत्या वर्णयत । | ०८ |
| **प्रश्नः -७** | **द्वाभ्यां एकां टिप्पणीं लिखत ।** | ०२ |
| | (१) अर्जुनः (२) पड्वर्गजयी | |
| **प्रश्नः -८** | **लघूत्तरप्रश्नाः अधोलिखितेभ्यः द्वयं लिखत ।** | ०२ |
| | (१) को नयेन जेतुं जगती समीहते ?<br>(२) रामेन सिद्धं के व्रजन्ति ?<br>(३) वर्णलिङ्गी इत्यस्य कोऽर्थः ?<br>(४) किरातार्जुनीयस्य कथा स्रोतः कस्माद् प्राप्यते । | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **निम्नलिखितेभ्यः श्लोकेभ्यः द्वयोः ससन्दर्भप्रसङ्गानुसारं मल्लिनाथटीकया व्याख्या कार्या ।** | ०८ |
| | (१) इमामहं वेद न तावकीं धियं विचित्ररूपा खलु चित्तवृत्तयः ।<br>विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसमं ममाधयः ॥<br>(२) द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।<br>परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥<br>(३) विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।<br>व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ | |
| | **चतुर्थान्वितिः – ४** | |
| **प्रश्नः -१०** | वनेचरेण कृतं वर्णनं लिखत ।<br>अथवा<br>राजनीतौ नृपस्य कृते ये गुणाः भारविद्वारा निबद्धाः ते भवद्भिः सरलसंस्कृतेन लेख्याः । | ०८ |
| **प्रश्नः -११** | **निम्नलिखिताभ्यः सूक्तिभ्यः द्वयोः सप्रसङ्गभावार्थं लिखत ।** | ०४ |
| | (१) अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।<br>(२) प्रविश्य हि घ्नन्ति शठाः ।<br>(३) सहसा विदधीत न क्रियाम् ।<br>(४) तावद्भा भारवेर्भाति यावन्माघस्य नोदयः । | |
| **प्रश्नः -१२** | **एकैकवाक्येन उत्तराणि यच्छत केषाञ्चित् पञ्चानां ।** | ०५ |
| | (१) किरातार्जुनीयस्य प्रधाननायिका का वर्तते ?<br>(२) हितं मनोहारि च दुर्लभं वचः इत्यस्य अर्थं लिखत ।<br>(३) महतां कां प्रवृत्तिर्भवति ?<br>(४) विजयार्थिनः राजानः किं कुर्वन्ति ?<br>(५) संवृणोति खलु दोषमज्ञता – अर्थं लिखत ।<br>(६) कालिदासस्य उपमा प्रसिद्धा भारवेः किं प्रसिद्धमस्ति ?<br>(७) प्राज्यम् इत्यस्य कोऽर्थः ? | |

***